# NCERT Solutions for Class 10 Sanskrit Shemushi Chapter 5 जननी तुल्यवत्सला

अभ्यासः

प्रश्न 1.
एकपदेन उत्तरं लिखत-

(क) वृषभः दीनः इति जानन्नपि कः तं नुद्यामान् आसीत्?
उत्तराणि:
कृषकः

(ख) वृषभः कुत्र पपात?
उत्तराणि:
क्षेत्रे

(ग) दुर्बले सुते कस्याः अधिका कृपा भवति?
उत्तराणि:
मातुः

(घ) कयोः एकः शरीरेण दुर्बलः आसीत्?
उत्तराणि:
बलीवर्दयोः

(ङ) चण्डवातेन मेघरवैश्च सह कः समजायत?
उत्तराणि:
प्रवर्षः

प्रश्न 2.
अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-

(क) कृषक: किं करोति स्म?
उत्तराणि:
कृषकः क्षेत्रकर्षणं करोति स्म।

(ख) माता सुरभिः किमथम् अश्रूणि मुञ्चति स्म?
उत्तराणि:
भूमौ पतिते स्वपुत्रं दृष्ट्वा माता सुरभिः अश्रूणि मुञ्चति स्म।

(ग) सुरभिः इन्द्रस्य प्रश्नस्य किमुत्तर ददाति?
उत्तराणि:
सुरभिः इन्द्रस्य इदम् उत्तरं ददाति-" भो वासव! पुत्रत्य दैन्यं दृष्ट्वा अहं रोदिमि।"

(घ) मातुः अधिका कृपा कस्मिन् भवति?
उत्तराणि:
मातुः अधिका कृपा दीने पुत्रे भवति।

(ङ) इन्द्रः दुर्बलवृषभस्य कष्टानि अपाकर्तुं किं कृतवान्?
उत्तराणि:
इन्द्रः दुर्बलवृषभस्य कष्टानि अपाकर्तुं प्रवर्षं कृतवान्।

(च) जननी कीदृशी भवति?
उत्तराणि:
जननी सर्वेषु अपत्येषु तुल्यवत्सला परं दीने पुत्र कृपाहृदया भवति।

(छ) पाठेऽस्मिन् कयोः संवादः विद्यते?
उत्तराणि:
अस्मिन् पाठे सुरभिसुराधिपइन्द्रयोः संवाद: विद्यते।

प्रश्न 3.
'क' स्तम्भे दत्तानां पदानां मेलनं 'ख' स्तम्भे दत्तैः समानार्थकपदौः कुरुत-

क स्तम्भ – ख स्तम्भ
(क) कृच्छ्रेण – (i) वृषभः
(ख) चक्षु□□□□□म – (ii) वासवः
(ग) जवने – (iii) नेत्राभ्याम्
(घ) इन्द्रः – (iv) अचिरम्
(ङ) पुत्राः – (v) द्रुतगत्या
(च) शीघ्रम् – (vi) काठिन्येन
(छ) बलीवर्दः – (vii) सुताः
उत्तराणि:
क स्तम्भ – ख स्तम्भ
(क) कृच्छेण – (i) काठिन्येन
(ख) चक्षाम् – (ii) नेत्राभ्याम्
(ग) जवने – (iii) द्रुतगत्या
(घ) इन्द्रः – (iv) वासवः
(ङ) पुत्राः – (v) सुताः
(च) शीघ्रम् – (vi) अचिरम्
(छ) बलीवर्दः – (vii) वृषभः

प्रश्न 4.
स्थूलपदमाधृत्य प्रश्ननिर्माणं कुरुत-

(क) सः कृच्छ्रेण भारम् उद्वहति।
उत्तराणि:
सः केन/कथम् भारम् उद्वहति?

(ख) सुराधिपः ताम् अपृच्छत्?
उत्तराणि:
कः ताम् अपृच्छत्?

(ग) अयम् अन्येभ्यो दुर्बलः।
उत्तराणि:
अयम् केभ्यः/ केभ्यो दुर्बलः?

(घ) धेनूनाम् माता सुरभिः आसीत्?
उत्तराणि:
कासाम् माता सुरभिः आसीत्?

(ङ) सहस्राधिकेषु पुत्रेषु सत्स्वपि सा दु:खी आसीत्।
उत्तराणि:
कति पुत्रेषु सत्स्वपि सा दु:खी आसीत्?

प्रश्न 5.
रेखांकितपदे यथास्थानं सन्धि विच्छेद वा कुरुत-

(क) कृषक: क्षेत्रकर्षणं कुर्वन् + आसीत्।
उत्तराणि:
कुर्वन्नासीत्

(ख) तयोरेक: वृषभः दुर्बलः आसीत्।
उत्तराणि:
तयोः + एकः

(ग) तथापि वृषः न + उत्थितः।
उत्तराणि:
नोत्थितः

(घ) सत्स्वपि बहुषु पुत्रेषु अस्मिन् वात्सल्यं कथम्?
उत्तराणि:
सत्सु + अपि

(ङ) तथा + अपि + अहम् + एतस्मिन् स्नेहम् अनुभवामि।
उत्तराणि:
तथाप्यहमेतस्मिन्

(च) मे बहूनि + अपत्यानि सन्ति।
उत्तराणि:
बहून्यपत्यानि

(छ) सर्वत्र जलोपप्लवः संजात:।
उत्तराणि:
जल + उपलव:

प्रश्न 6.
अधोलिखितेषु वाक्येषु रेखांकितसर्वनामपदं कस्मै प्रयुक्तम्-

(क) सा च अवदत् भो वासव! भृशं दु:खिता अस्मि।
उत्तराणि:
धेनुमात्रे सुरभये (सुरभ्यै)।

(ख) पुत्रस्य दैन्यं दृष्ट्वा अहम् रोदिमि।
उत्तराणि:
धेनुमात्रे सुरभये (सुरभ्यै)।

(ग) सः दीनः इति जानन् अपि कृषकः तं पीडयति।
उत्तराणि:
दुर्बल बलीवय।

(घ) मे बहूनि अपत्यानि सन्ति।
उत्तराणि:
धेनुमात्रे सुरभये (सुरभ्यै)।

(ङ) सः च ताम् एवम् असान्त्वयत्।
उत्तराणि:
आखण्डलाय (इन्द्राय)।

(च) सहस्रेषु पुत्रेषु सत्सवपि तव अस्मिन् प्रीतिः अस्ति।
उत्तराणि:
धेनुमात्रे सुरभये (सुरभ्यै)।

प्रश्न 7.
‘क’ स्तम्भे विशेषणपदं लिखितम्, ‘ख’ स्तम्भे पुनः विशेष्यपदम्। तयोः मेलनं कुरुत-

क स्तम्भ – ख स्तम्भ
(क) कश्चित् – (i) वृषभम्
(ख) दुर्बलम् – (ii) कृपा
(ग) क्रुद्धः – (iii) कृषीवलः
(घ) सहस्राधिकेषु – (iv) आखण्डलः
(ङ) अभ्यधिका – (v) जननी
(च) विस्मितः – (vi) पुत्रेषु
(छ) तुल्यवत्सला – (vii) कृषकः
उत्तराणि:
क स्तम्भ – ख स्तम्भ
(क) कश्चित् – (i) कृषकः
(ख) दुर्बलम् – (ii) वृषभम्
(ग) क्रुद्धः – (iii) कृषीवलः
(घ) सहस्राधिकेषु – (iv) पुत्रेषु
(ङ) अभ्यधिका – (v) कृपा
(च) विस्मितः – (vi) आखण्डलः
(छ) तुल्यवत्सला – (vii) जननी